# Hymn to Goddess mInAkShI

# મીનાક્ષીસ્તોત્રમ્

## Document Information

Text title : miinaakshistotram 1

File name : miinaakshistotra.itx

Category : devii, mInAkShI, stotra, shankarAchArya, devI

Location : doc_devii

Author : Adi Shankaracharya

Transliterated by : Ravi Mayavaram msr at comco.com

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Description-comments : Hymn to Goddess Minakshi

Latest update : September 29, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# મીનાક્ષીસ્તોત્રમ્

॥ શ્રીઃ ॥

શ્રીવિદ્યે શિવવામભાગનિલયે શ્રીરાજરાજાર્ચિતે
    શ્રીનાથાદિગુરુસ્વરૂપવિભવે ચિન્તામણીપીઠિકે ।
શ્રીવાણીગિરિજાનુતાઙ્ઘ્રિકમલે શ્રીશામ્ભવિ શ્રીશિવે
    મધ્યાહ્ને મલયધ્વજાધિપસુતે માં પાહિ મીનામ્બિકે ॥ ૧ ॥

ચક્રસ્થેઽચપલે ચરાચરજગન્નાથે જગત્પૂજિતે
    આર્તાલીવરદે નતાભયકરે વક્ષોજભારાન્વિતે ।
વિદ્યે વેદકલાપમૌલિવિદિતે વિદ્યુલ્લતાવિગ્રહે
    માતઃ પૂર્ણસુધારસાર્દ્રહૃદયે માં પાહિ મીનામ્બિકે ॥ ૨ ॥

કોટીરાઙ્ગદરત્નકુણ્ડલધરે કોદણ્ડબાણાઞ્ચિતે
    કોકાકારકુચદ્વયોપરિલસત્પ્રાલમ્બહારાઞ્ચિતે ।
શિઞ્જન્નૂપુરપાદસારસમણીશ્રીપાદુકાલઙ્કૃતે
    મદ્દારિદ્ર્યભુજઙ્ગગારુડખગે માં પાહિ મીનામ્બિકે ॥ ૩॥

બ્રહ્મેશાચ્યુતગીયમાનચરિતે પ્રેતાસનાન્તસ્થિતે
    પાશોદઙ્કુશચાપબાણકલિતે બાલેન્દુચૂડાઞ્ચિતે ।
બાલે બાલકુરઙ્ગલોલનયને બાલાર્કકોટ્યુજ્જ્વલે
    મુદ્રારાધિતદૈવતે મુનિસુતે માં પાહિ મીનામ્બિકે ॥ ૪ ॥

ગન્ધર્વામરયક્ષપન્નગનુતે ગઙ્ગાધરાલિઙ્ગિતે
    ગાયત્રીગરુડાસને કમલજે સુશ્યામલે સુસ્થિતે ।
ખાતીતે ખલદારુપાવકશિખે ખદ્યોતકોટ્યુજ્જ્વલે
    મન્ત્રારાધિતદૈવતે મુનિસુતે માં પાહી મીનામ્બિકે ॥ ૫ ॥

નાદે નારદતુમ્બુરાદ્યવિનુતે નાદાન્તનાદાત્મિકે
    નિત્યે નીલલતાત્મિકે નિરુપમે નીવારશૂકોપમે ।

કાન્તે કામકલે કદમ્બનિલયે કામેશ્વરાઙ્કસ્થિતે
મદ્વિદ્યે મદભીષ્ટકલ્પલતિકે માં પાહિ મીનામ્બિકે ॥ ૬ ॥

વીણાનાદનિમીલિતાર્ધનયને વિસ્રસ્તચૂલીભરે
તામ્બૂલારુણપલ્લવાધરયુતે તાટઙ્કહારાન્વિતે ।
શ્યામે ચન્દ્રકલાવતંસકલિતે કસ્તૂરિકાફાલિકે
પૂર્ણે પૂર્ણકલાભિરામવદને માં પાહિ મીનામ્બિકે ॥ ૭ ॥

શબ્દબ્રહ્મમયી ચરાચરમયી જ્યોતિર્મયી વાઙ્મયી
નિત્યાનન્દમયી નિરઞ્જનમયી તત્ત્વંમયી ચિન્મયી ।
તત્ત્વાતીતમયી પરાત્પરમયી માયામયી શ્રીમયી
સર્વૈશ્વર્યમયી સદાશિવમયી માં પાહિ મીનામ્બિકે ॥ ૮ ॥

ઇતિ શ્રીમત્પરમહન્સપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ મીનાક્ષીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Ravi Mayavaram msr@comco.com
Proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*Hymn to Goddess mInAkShI*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*